## द्यावापृथिवीशुनासीरमरुत्वदग्नीषोमवास्तोष्पतिगृहमेधाच्छ च । (३२/१२३५)

द्यावापृथिव्यादिभ्यः छः प्रत्ययो भवति साऽस्य देवता इत्यस्मिन् विषये, चकाराद् यच्च । अणो ण्यस्य चापवादः । द्यौश्च पृथिवी च द्यावापृथिव्यौ देवते अस्य 'द्यावापृथिवीयम्' (मै. १.८.१०), 'द्यावापृथिव्यम्' (तै. सं. १.८.२.१) । शुनश्च सीरश्च[1] तौ देवते अस्य [2]इति 'शुनासीरीयम्' (काठ. सं. २६.४), 'शुनासीर्यम्' (मै. ४.३.३) । शुनो वायुः । सीरः आदित्यः । मरुत्वान् देवता अस्य 'मरुत्वतीयम्' (तै. ४.४.२.२), मरुत्वत्यम् । 'अग्नीषोमीयम्' (तै. सं. १.८.१.१), अग्नीषोम्यम् । 'वास्तोष्पतीयम्' (तै. ३.४.१०.३), 'वास्तोष्पत्यम्' (मै. १.५.१३) । 'गृहमेधीयम्' (ऋ. ७.५६.१४), 'गृहमेध्यम्' (काठ. सं. ३६.९) ॥

## अग्नेर्ढक् । (३३/१२३६)

अग्निशब्दाद् ढक् प्रत्ययो भवति साऽस्य देवता इत्यस्मिन् [3]विषये । अणोऽपवादः । अग्निर्देवता अस्य '[4]आग्नेयोऽष्टाकपालः' (काठ. सं. ८.१०) ।

[४०९] प्राग्दीव्यतीयेषु तद्धितार्थेषु सर्वत्राग्निकलिभ्यां ढग् वक्तव्यः ।

## कालेभ्यो भववत् । (३४/१२३७)

[5]कालविशेषवाचिभ्यः [6]शब्देभ्यो भववत् [7]प्रत्यया भवन्ति साऽस्य देवता इत्यस्मिन् [8]विषये । 'कालाट् ठञ्' (४.३.११/१३८१) [9]इति प्रकरणे [10]भवे प्रत्यया विधास्यन्ते [11]ते साऽस्य देवता इत्यस्मिन्[12]अर्थे तथैवेष्यन्ते, तदर्थमिदमुच्यते । वत्करणं [13]सर्वसादृश्यपरिग्रहार्थम् । मासे भवम् मासिकम् । [14]आर्धमासिकम् । सांवत्सरिकम् । [15]वासन्तम् । [16]प्रावृषेण्यम् । [17]तथा मासो देवताऽस्य मासिकम् । [18]आर्धमासिकम् । सांवत्सरिकम् । [19]वासन्तम् । [20]प्रावृषेण्यम् ॥

## महाराजप्रोष्ठपदाट् ठञ् । (३५/१२३८)

[21]महाराजशब्दात् प्रोष्ठपदशब्दाच्च ठञ् प्रत्ययो भवति साऽस्य देवता इत्यस्मिन् विषये । महाराजो देवता अस्य माहाराजिकम् । [22]प्रौष्ठपदिकम् ।

---

1. शुनासीरौ इत्यधिकम् ब. क. फ, सा देवता ब. 2. इति नास्ति फ. 3. अर्थे फ. 4. आग्नेयमष्टाकपालं निर्वपेत् ग. फ. (मै. सं. 1.4.15.) 5. कालशब्देभ्यो ह. 6. प्रातिपदिकेभ्यः फ. 7. प्रत्ययो भवति क. ब. 8. अर्थे क. 9. इत्यादिना प्रकरणेन भवे ये प्रत्यया विधायिष्यन्ते ते ब. 10. भवप्रत्ययाः क. 11. ते नास्ति फ. 12. विषये ह. 13. सर्वसादृश्यार्थम् फ, सादृश्यग्रहणार्थम् ग, सादृश्यप्रतिपत्त्यर्थम् क. 14. अर्धमासिकम् क. 15. वासन्तिकम् ह. 16. प्रावृषेण्यम् नास्ति क. 17. एवं क. फ. 18. आर्धमासिकम् नास्ति फ, अर्धमासिकम् क. 19. वासन्तिकम् ह. 20. प्रावृषेण्यम् नास्ति क. 12. महाराजप्रोष्ठपदाभ्याम् फ. 22. प्रौष्ठपादिकम् क.